मेदोऽस्थिदुर्गन्धा" हरिवं ५३अ० "सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्" सुश्रुतः ।

**दुर्गन्धाङ्ग** त्रि०दुर्गन्धोऽङ्गे यस्य । पूतिगन्धान्वितदेहवति स्त्रियां ङीप् । शाता० सौगन्धिकपुष्पाहरणेन तथाङ्गतेत्युक्तम् यथा "सौगन्धिकस्य हरणात् दुर्गन्धाङ्गः प्रजायते"

**दुर्गन्धिन्** त्रि० दुर्गन्धोऽस्त्यस्य नित्ययोगे इनि "तेन न कर्मधारयात् मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यस्य न प्रवृत्तिः । १दुष्टगन्धयुक्ते त्रि० रायमुकुटः "चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः" मनुः । स्त्रियां ङीप् ।

**दुर्गपति** पु० ६त०। १दुर्गरक्षके दुर्गाध्यक्षभेदे । २दुर्गस्वामिनि च । "वयं जयेम हेलाभिर्दस्यून् दुर्गपतिर्यथा" भाग० ३।१४।१८

**दुर्गपाल** पु० दुर्गं दुर्गं वा पालयति पालि–अण् उप०स० । १कष्टपालके 'यज्ञोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरभिवन्दिताङ्घ्रिः" भाग० ८।२३।५। २दुर्गरक्षके च

**दुर्गपुष्पी** स्त्री दुर्गं पुष्पमस्याः जातित्वात् ङीष् । (केशपुष्पा) ख्याते वृक्षभेदे शब्दच० ।

**दुर्गम** पु० दुःखेन गम्यतेऽसौ दुर्+गम–कर्मणि खल् । १दुर्गनामासुरभेदे "दुर्गमाख्यं महासुरम्" देवीमा०। २दुर्गमनीये त्रि०। "कान्तारोवर्त्म दुर्गमम्"अमरः । ३दुर्ज्ञेये च ४परमेश्वरे पु० दुर्गशब्दे दृश्यम् "दुःखेन गम्यते ज्ञायते इति दुर्गमः" भाष्ये तन्नामनिरुक्तिः ।

**दुर्गल** पु० दुःस्थितो गलो यत्र लोकानाम् । देशभेदे "दुर्गलाः प्रतिमास्याश्च कुन्तलाः कोशलास्तथा" भा० भी० ६अ० जनपदोक्तौ । सोऽभिजनोऽस्य, तस्य राजा वा अण् । दौर्गल पित्रादिक्रमेण तद्देशवासिनि तन्नृपे च । बहुषु अणो लुक् । दुर्गला इत्येव ।

**दुर्गलङ्घन** पुंस्त्री० दुर्गं लङ्घ्यतेऽनेन लङ्घि–करणे ल्युट् । उष्ट्रे हेमच० स्त्रियां जातित्वात् ङीष् ।

**दुर्गसंस्कार** पु० ६त० । प्रतिपक्षस्य युद्धार्थोद्योगे राज्ञा स्वदुर्गस्य भग्नप्रायस्य पुनर्नवीकरणे "अतो दुर्गसंस्कारे आरब्धव्ये किं कौमुदीमहोत्सवेन" इति मुद्रारा०

**दुर्गसञ्चर** पु० दुर्गं संचर्यतेऽनेन सम्+चर–करणे अप् । (सांको) संक्रमे हेमच०चञ् । दुर्गसंचारोऽप्यत्र अमरटीकायां क्षीरस्वामी

**दुर्गसिंह** पु० कलापपरिशिष्टकारे विद्वद्भेदे

**दुर्गा** स्त्री दुर्गशब्दोक्ते १देवीभेदे तन्निरुक्त्यादिकं तत्र दर्शितम् । २नीलीवृक्षे मेदि० । ३अपराजितायाम् शब्दच० ४श्यामाखगे राजनि० । ५हिमालयकन्यायाञ्च "सा दुर्गा मेनकाकन्या दैन्यदुर्गतिनाशिनी" ब्रह्मवै०पु०

**दुर्गाढ** त्रि० दुर्+गाह–कर्मणि क्त । कष्टेणावगाह्ये "दुर्गाढो नयमार्गोऽयमित्याहुस्तद्विदोजनाः" हरिवं०२३६अ०

**दुर्गाध्यक्ष** पु० ६त० । दुर्गरक्षके सेनाभेदे "अनाहार्यश्च शूरश्च तथा प्राज्ञः कुलोद्भवः । दुर्गाध्यक्षः स्मृतो राज्ञ उद्युक्तः सर्वकर्मसु" मत्स्यपु० तल्लक्षणमुक्तम् ।

**दुर्गानवमी** स्त्री दुर्गाप्रिया तत्पूजाङ्गत्वात् नवमी । कार्तिकशुक्लपक्षीयनवम्याम् । दुर्गाया इयम् अण् ङीप् । दौर्गी तत्पूजयाङ्गनवमीतिथौ "श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी । पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्" ति०त०। तत्पूजाविधानादि योगिनीतन्त्रे यथा

"कार्तिकेऽमलपक्षे च नवम्याञ्च विशेषतः । उद्बुद्धां तु जगद्धात्रीं पूजयेद् दीपमालया" तन्त्रान्तरे "त्रिकालं पूजयेद्दुर्गां मनुनैकाक्षरेण (दुँ)च । नानाबलिविधानेन गीतवाद्यपुरःसरम् । कार्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः । कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्" कुब्जिकातन्त्रे "कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् । दुर्गां प्रपूजयेद् भक्त्या धर्मकामार्थसिद्धये । शक्तिसङ्गमतन्त्रे "कार्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् । त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् । निर्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः । पूजयित्वा परदिने प्रतिमां तां विसर्जयेत् । एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः । पुत्रपौत्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी । दासदासीगणैर्युक्तो मुक्तः स्यात् पापसङ्कटात् । विशेषतः वसुयुतां नवमीं प्राप्य साधकः । पूजयित्वा स्वर्णमयीं तां लभते वाञ्छितं फलम्" भविष्ये "मासैश्चतुर्भिर्यत् पुण्यं विधिनाऽऽपूज्य चण्डिकाम् । तत् फलं लभते धीर ! नवम्यां कार्तिकस्य च" । अधिकं जगद्धात्रीशब्दे ३००४पृ०दृश्यम् ।

**दुर्गास्मरण** न० "दुर्गा जगदिदं सर्वं दुर्गा सर्वस्य कारणम् । अहञ्च दुर्गेत्येवं यत् तद्दुर्गास्मरणं विदुः" इत्युक्ते चिन्तनभेदे ।

**दुर्गाह्व** पु० दुर्गा आह्वास्य । भूमिजगुग्गुलौ राजनि० ।

**दुर्ग्रभि** त्रि० दुःखेन गृह्यतेऽसौ दुर्+ग्रह–आ० कर्मणि कि सम्प्रसारणम् वेदे हस्य भः । दुर्ग्राह्ये मनोतुमशक्ये "न इन्द्राद्विधाय दुर्ग्रभिः" ऋ० १।१४०।६ "इतस्य यत्प्रवेशे दुर्ग्रभिश्वनः" १।५२।६ "दुर्ग्रभिश्वनः